"अकालकौमुदीञ्चैव चक्रतुः सार्व्वकालिकीम्" ॥ कौमुदस्य कार्त्तिकमासस्य इयं "तस्येदम्" । ४ । ३ । १२० । इति अण् । ततो ङीप् । यदुक्तम् ।
"कुशब्देन मही ज्ञेया मुद हर्षे ततो द्वयम् ।
धातुज्ञैर्नियमैश्चैव तेन सा कौमुदी स्मृता" ॥)
कार्त्तिकोत्सवः । स तु कार्त्तिकीपूर्णिमायां कर्त्तव्यः । इति त्रिकाण्डशेषः । कार्त्तिकीपूर्णिमा ॥ आश्विनीपूर्णिमा । इति शब्दरत्नावली । (यथा,—
"आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये" ॥
दीपोत्सवतिथिः । यथा, रघुप्रभृतिटीकाकृन्मल्लिनाथधृतभविष्योत्तरवचनम् ।
"कौ मोदन्ते जना यस्यां तेनासौ कौमुदी स्मृता" ॥
कुमुदान्येव कौमुदी । सदी वा सालुक इति भाषा ॥)

कौमुदीचारः, पुं स्त्री, (कौमुद्याः ज्योत्स्नायाः चारः प्रशस्तमत्र समये ।) कोजागरपूर्णिमा । इति त्रिकाण्डशेषः ॥

कौमुदीपतिः, पुं, (कौमुद्याः ज्योत्स्नायाः पतिः ।) चन्द्रः । इति हेमचन्द्रः ॥

कौमुदीवृक्षः, पुं, (कौमुद्याः इव प्रकाशिकायाः दीपशिखाया वृक्ष इवाधारः ।) दीपवृक्षः । इति हारावली ॥ दीपगाछा पिलसुज इत्यादि भाषा ॥

कौमोदकी, स्त्री, (कोः पृथिव्याः पालकत्वात् मोदकः । कुमोदको विष्णुः । तस्येयं इत्यण् ततो ङीप् ।) विष्णुगदा । इत्यमरः । १ । १ । ३० ॥ (यथा, भागवते । ८ । ४ । १९ ।
"श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम" ॥)

कौमोदी, स्त्री, (कुं पृथ्वीं मोदयति नन्दयतीति । कुमोदः विष्णुः तस्येयं इति अण् ततो ङीप् ।) विष्णुगदा । इति शब्दरत्नावली ॥

कौरवः, पुं स्त्री, (कुरोरपत्यमिति अण् । कुरोरयं इति कच्छादित्वादण् वा । कुरुराजसन्ततिः । इति महाभारतम् ॥ (यथा, महाभारते । १ । द्रुपदशासने १३८ । १६ ।
"तमुद्यतं रथेनैकमाशुकारिणमाहवे ।
अनेकमिव सन्त्रासान्मेनिरे तत्र कौरवाः" ॥
कुरुसम्बन्धिदेशः । यथा, मेघदूते । ५० ।
"क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः" ॥
स्त्रियां ङीप् कौरवी कुरुसम्बन्धिनीत्यर्थः । यथा, महाभारते । १ । १३०१ । १५ ।
"द्रुपदः कौरवान् दृष्ट्वा प्राधावत समन्ततः ।
शरजालेन महता मोहयन् कौरवीं चमूम्" ॥)

कौरव्यः, पुं, (कुरोरपत्यम् । "कुर्व्वादिभ्यो ण्यः" । ४ । १ । १५१ । इति ण्यः ।) कौरवः । (यथा, महाभारते । ३ । २३२ । ५५ ।
"अनिशायां निशायाश्च सहायाः क्षुत्पिपासयोः ।
आराधयन्त्याः कौरव्यांस्तुल्या रात्रिरहश्च मे" ॥
कौरव्याः ब्राह्मणाः कुरुसम्बन्धिनो ब्राह्मणा इत्यर्थः । क्षत्त्रिये तु । "कुर्व्वादिभ्यो ण्यः" । ४ । १ । १७२ । इति ण्ये कृते तद्राजस्य बहुषु तेनैवास्त्रियामिति बहुत्वे लुकि कुरव इति बोध्यम् ॥ नागविशेषः । यथा, महाभारते । १ । ३५ । १३-१४ ।
"कौरव्यो धृतराष्ट्रश्च शङ्खपिण्डश्च वीर्य्यवान् ।
विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्य्यवान्" ॥)

कौर्प्यः, पुं, वृश्चिकराशिः । यथा, दीपिकायाम् ।
"क्रियतावरिजितुमकुलीरलेयपाथेय यूककौर्प्याख्याः ।
तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम्" ॥)

कौलः, त्रि, (कुले सत्कुले भव इत्यण् ।) सत्कुलोद्भवः । तत्पर्य्यायः । आन्वयिकः २ । इति त्रिकाण्डशेषः ॥ (कुले कुलाचारे रतः कुलं कुलतत्त्वं वेत्ति वा इत्यण् ।) दिव्यवीरपशुभावत्रयान्तर्गतदिव्यभावरतः । स तु ब्रह्मज्ञानी । तद्यथा,—
"दिव्यभावरतः कौलः सर्व्वत्र समदर्शनः" ॥
इति कुलार्णवतन्त्रम् ॥
"पशोर्वक्त्राल्लब्धमन्त्रः पशुरेव न संशयः ।
वीराल्लब्धमनुर्व्वीरः कौलाच्च ब्रह्मविद्भवेत्" ॥ इति महानीलतन्त्रम् ॥ (कुलमधिकृत्य कृतो ग्रन्थः । कुलाचारतत्त्वविधिप्रतिषेधोपदेशसाध्यसाधनव्यापारविशिष्टकुलोपनिषदादिग्रन्थविशेषः ॥)

कौलकेयः, त्रि, (कुले सत्कुले भव इति ढक् कुक् च ।) सत्कुलोद्भवः । (कुलटायाः अपत्यं इति ढक् । पृषोदरात् ततः कक्ष ।) असतीपुत्त्रे, पुं । इति शब्दरत्नावली ॥

कौलटिनेयः, पुं स्त्री, (कुलटाया अपत्यं । "कुलटाया वा" । ४ । १ । १२७ । इति । इनङ् । स्त्रीभ्यो ढक् ।) असतीपुत्त्रः । तत्पर्य्यायः । कौलटेयः २ । इत्यमरः ॥ कौलटेरः ३ । इति तट्टीकासारसुन्दरी । २ । ६ । २७ ॥ सती या भिक्षार्थं कुलानि गृहाणि अटति न तु जारार्थं सापि कुलटा तत्पुत्त्रोऽपि ॥

कौलटेयः, पुं, स्त्री, (कुलटायाः असत्याः अपत्यं इति ढक् ।) कौलटिनेयः । असतीसुतः । इत्यमरः । २ । ६ । २६ ॥ (कुलानि गृहाणि भिक्षार्थं अटति या सती सापि कुलटा । तस्या अपत्येऽपि इति कश्चित् ॥ स्त्रियां ङीप् कौलटेयी ॥)

कौलटेरः, पुं स्त्री, (कुलानि गृहाणि व्यभिचारार्थं अटति सा कुलटा । तस्याः असत्याः अपत्यम् । "क्षुद्राभ्यो वा" । ४ । १ । १३१ । इति ढ्रक् ।) असतीसुतः । इत्यमरः । २ । ६ । २६ ॥ कौलटिनेयः । इति सारसुन्दरी । (कुलानि गृहाणि भिक्षार्थमटति या सती सापि कुलटा तस्या अपत्येऽपि । इति कश्चित् । स्त्रियां ङीप् कौलटेरी ॥)

कौलत्थीनं त्रि, (कुलत्थस्य कुलत्थाख्यकलायविशेषस्य भवनं क्षेत्रं वा इति । "धान्यानां भवने क्षेत्रे खञ्" । ५ । २ । १ । इति । खञ् ।) कुलत्थकलायोद्भवक्षेत्रम् । इत्यमरटीकायां भरतः ॥

कौलवः, पुं, ववाद्येकादशान्तर्गततृतीयकरणम् । तत्र जातस्य फलं यथा,—
"वाग्मी विनीतो नितरां स्वतन्त्रः
प्रागल्भ्ययुक्तो मनुजो महौजाः ।
सुसम्मतः स्याद्विदुषां कृतघ्न-
श्चेत् कौलवाख्यं करणं प्रसूतौ" ॥
इति कोष्ठीप्रदीपः ॥

कौलिकः, पुं, (कुलं सूत्रादिकं वयति वस्त्रत्वेनावरणादिकं आपादयतीति । ठक् ।) तन्तुवायः । इति शब्दमाला ॥ (कु कुत्सितं जघन्याचारं लातीति । कुलः दुःशीलः ततः स्वार्थे ठक् ।) पाषण्डः । इति त्रिकाण्डशेषः । (कुलादागतमिति ठक् ।) कुलपरम्परायाते, त्रि ॥ (यथा, पञ्चतन्त्रे ।
"वर्जयेत् कौलिकाचारं मित्रं प्राज्ञतरो नरः" ॥
कुले कुलागमे कुलतन्त्रे शिवोक्तशास्त्रे इति यावत् सिद्धः इति ठक् । कुलतन्त्रज्ञः ॥ कौलं कुलधर्म्मं प्रवर्त्तयति तत्त्वज्ञानं शिष्यपरम्परोपदेशेन विस्तारयति इति ठक् । कुलधर्म्मप्रवर्त्तकः शिवः ॥ कुलं कुलाचारः प्रयोजनमस्य इति ठक् । ब्रह्मतत्त्वज्ञः । यथा, श्रुतौ । "शम्भुः कौलिकः" ॥)

कौलीनं, क्ली, (कौ पृथिव्यां लीनम् । भूलीनपदार्थानामिव एतेषामप्रकाशतया तथात्वम् ।) गुह्यम् । जन्यम् । कुकर्म्म । (कुलीनस्य भावः । युवादित्वादण् ।) कुलीनत्वम् । (यथा, रामायणे ।
"सदश्व इव मर्य्यादां कौलीनां नाभ्यवर्त्तत" ॥)
पश्वहिपक्षिणां युद्धम् । इति मेदिनी ॥ कौलेयकः । इति विश्वः ॥ (ली भावे क्तः तस्य नत्वम् । लीनं लयः । कौ पृथिव्यां लीनं लयो यस्मात् । कुलीनं भूमिलयमर्हतीति अण् वा ।) लोकवादः । इत्यमरः । ३ । ३ । ११६ ।
(यथा, रघौ । १४ । ८४ ।
"कौलीनभीतेन गृहान्निरस्ता
न तेन वैदेहसुता मनस्तः" ॥
निन्दा । यथा, तत्रैव । १४ । ३६ ।
"कौलीनमात्माश्रयमाचचक्षे
तेभ्यः पुनश्चेदमुवाच वाक्यम्" ॥)

कौलीरा, स्त्री, (कुलीरः कर्कटः तच्छृङ्गाकारोऽस्त्यस्या इत्यण् । ततष्टाप् ।) कर्कटशृङ्गी । इति राजनिर्घण्टः ॥ (कर्कटशृङ्गीशब्देऽस्या विवृतिर्ज्ञेया ॥)

कौलेयः, त्रि, (कुले सत्कुले भवः इति बाहुलकात् ढक् ।) कुलीनः । इति भरतो द्विरूपकोषश्च ॥

कौलेयकः, पुं, (कुले भवः । "कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु । ४ । २ । ९६ । इति ढकञ् ।) कुक्कुरः । इत्यमरः । २ । १० । २१ ॥ (कुलस्यापत्यम् । "अपूर्व्वपदादन्यतरस्यां यड्ढकञौ" । ४ । १ । १४० । इति ढकञ् ।) कुलीने त्रि । इति मेदिनी ॥

कौल्माषीणं, त्रि, (कुल्माषाणां धान्यकुलत्थादीनां भवनं क्षेत्रं इति खञ् ।) कुल्माषधान्योद्भवक्षेत्रम् । इत्यमरटीकायां रायमुकुटः ॥

कौल्यः, त्रि, (कुले सत्कुले भवः बाहुलकात् यञ् ।) कुलीनः । इति भरतो द्विरूपकोषश्च ॥

कौवलं, क्ली, (कुवलमेव इति । प्रज्ञादित्वात् स्वार्थे णः ।) कुवलम् । कोलिफलम् । इति भरतो द्विरूपकोषश्च ॥

कौवेरं, क्ली, (कुवेरो अधिष्ठात्री देवताऽस्य इत्यण् ।) कुष्ठम् । कुड् इति भाषा । इति शब्दरत्नावली ॥ (कुवेरस्य इदं इत्यण् ।) कुवेरसम्बन्धिनि तत्कार्य्ये च त्रि । यथा, मार्कण्डेये । ८५ । २ ।